Bamanpukur Humayun Kabir Mahavidyalaya.
Model Question Paper
SANGCOR02T — SANSKRIT (DSC 2)

Full marks - 50

## SECTION - A

2×5 = 10

1. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः

(क) बाणभट्टः कः आसीत् ? तस्य रचना काः आसन् ?

(ख) गद्यं कतिविधं किञ्च तावत् ?

(ग) 'कादम्बरी' इति शब्दस्य कोऽर्थः ?

(घ) शुकनासः कः आसीत् ? तेन कः उपदिष्टः अभवत् ?

(ङ) चन्द्रापीडः कः आसीत् ?

(च) 'अतिगहनं तमो यौवनप्रभवम्' - कः कं प्रति एवम् उक्तवान् ? कथं यौवनप्रभवं तमो अतिगहनम् ?

(छ) कादम्बरी का आसीत् ? तत्र नायिका-नायकौ कौ स्तः ?

(ज) किं प्रकारकं काव्यं कादम्बरी इति ? शुकनासः कथं चन्द्रापीडम् उपदिष्टवान् ?

(झ) दण्डिनः विरचितं गद्यकाव्यं किमस्ति ?

(ञ) दण्डिनः समयकालः कः भवति ?

(ट) कथाप्रकारकं गद्यकाव्यं किं भवति ? आख्यायिका प्रकारकं गद्यकाव्यं किं भवति ?

(ठ) सुबन्धुना रचितं गद्यकाव्यं किमस्ति ? वासवदत्तयाः नायिका का अस्ति ?

2. अधोलिखितेषु प्रश्नद्वयस्य उत्तरं संस्कृतभाषया देवनागरीलिप्या च व्याख्येयम्।

5×2 = 10

(क) गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलस्नानमनुपजातपलितादिवैरूप्यमजरं वृद्धत्वम् अनारोपितमेदोदोषं गुरुकरणम्, सुवर्णविरचनमग्राम्यं कर्णाभरणमतीतज्योतिरालोको नोद्वेगकरः प्रजागरः।

(ख) यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपजाति बुद्धिः। अनुज्झितधवलापि सरागैव भवति यूनां दृष्टिः। अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरम् आत्मेच्छया यौवनसमये पुरुषं प्रकृतिः। इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयम् उपभोगमृगतृष्णिका।

(ग) विश्वरूपत्वमिव गृहीत्वमाश्रिता नारायणमूर्त्तिम्। अप्रत्ययबहुला मुञ्चति च दिवसान्तकमलमिव समुपचितमूलदण्डकोषमण्डलमपि मुञ्चति भूभुजम्। लतेव विटपकानध्यारोहति।

(घ) परस्परविरुद्धं चेन्द्रजालमिव दर्शयन्ती प्रकटयति जगति निजं चरित्रम्। तथाहि सततम् उष्माणमारोपयन्त्यपि जाड्यमुपजनयति। उन्नतिमादधानापि नीचस्वभावतामाविष्करोति। तोयराशिसम्भवापि ~~तृष्णा~~ तृष्णां संवर्द्धयति। ईश्वरतां दधानापि अशिवप्रकृतित्वमातनोति। बलोपचयमाहरन्त्यपि लघिमानमापादयति, अमृतसहोदरापि कटुविपाका।

अथवा

अधोलिखितेषु विषयेषु प्रश्नद्वयस्य उत्तरं संस्कृतभाषया देवनागरीलिप्या च टीकां लिखत।

(क) बाणभट्ट (ख) शुकनास (ग) कादम्बरी (घ) चन्द्रापीड

## SECTION-B

10x1=10

3. निम्नलिखितेषु प्रश्नेषु कस्यचिदेकस्योत्तरं प्रदेयम्।

(क) महाकविना अम्बिकादत्तव्यासेन विरचितस्य 'शिवराजविजयः' इति काव्यस्य प्रथमनिश्वासस्य प्रधानविशेषत्वानां वर्णना प्रदीयताम्।

(ख) पण्डित अम्बिकादत्तव्यासेन विरचितस्य 'शिवराजविजयः' इति काव्यस्य प्रथमनिश्वासानुसरणे ब्रह्मचारिगुरोः चरित्रम् आलोच्यताम्।

(ग) पण्डित-अम्बिकादत्तव्यासेन विरचितस्य 'शिवराजविजयः' इत्यस्य प्रथमनिश्वासस्य अनुसरणेन गौरसिंहस्य चरित्रम् आलोच्यताम्।

(घ) महाकविना अम्बिकादत्तव्यासेन विरचितस्य 'शिवराजविजयः' इत्यस्य प्रथमनिश्वासानुसरणे ~~ब्र~~ ब्रह्मचारिगुरुदेवयोगिराजयोः कथोपकथनम् आलोच्यताम्।

5x1=5

4. अधोलिखितेषु प्रश्नेषु एकस्य व्याख्येयम्।

(क) तं केचित् कपिल इति, अपरे लोमश इति, इतरे जैगीषव्य इति, अन्ये च मार्कण्डेय इति, विश्वसन्ति स्म।

(ख) अहो! चिररात्राय सुप्तोऽहम्, स्वप्नजालपरतन्त्रेणैव महान् पुण्यमयः समयोऽतिवाहितः।

(ग) अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः।

(घ) एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचर-चक्रस्य, कुण्डलमाखण्डलदिशः।

(ङ) विष्णोर्माया भगवती यया सम्मोहितं जगत्।

अथवा

अधोलिखितेषु विषयमेकम् आश्रित्य टीका लेख्या । 5

(क) अम्बिकादत्तव्यास

(ख) ब्रह्मचारिणी:

(ग) गौरसिंह

(घ) योगिराजः

SECTION - C

5. अधोलिखितेषु प्रश्नेषु कस्यचिदेकस्योत्तरं प्रदेयम् । 10×1=10

(क) गद्यकाव्यस्य प्रकृतिविवर्तनञ्च लिख्यताम् ।

(ख) बाणोच्छिष्टं जगत् सर्वम् - इति व्याख्यायताम् ।

(ग) दण्डिनः पदलालित्यम् - इति व्याख्यायताम् ।

6. अधोलिखितेषु प्रश्नेषु कस्यचिदेकस्य टीका लेख्या । 5×1=5

(क) दशकुमारचरितम् (ख) सुबन्धु (ग) हर्षचरितम् (घ) कादम्बरी (ङ) शिवराजविजयम्